# nirodhalakShaNam

# નિરોધલક્ષણમ્

## Document Information

Text title : nirodhalakShaNam

File name : nirodhalakShaNam.itx

Category : vishhnu, krishna, puShTimArgIya, vallabhaachaarya, vishnu

Location : doc_vishhnu

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# નિરોધલક્ષણમ્

યચ્ચ દુઃખં યશોદાયા નન્દાદીનાં ચ ગોકુલે ।
ગોપિકાનાં તુ યદ્દુઃખં તદ્દુઃખં સ્યાન્મમ ક્વચિત્ ॥ ૧॥

ગોકુલે ગોપિકાનાં ચ સર્વેષાં વ્રજવાસિનામ્ ।
યત્સુખં સમભૂત્તન્મે ભગવાન્ કિં વિધાસ્યતિ ॥ ૨॥

ઉદ્ધવાગમને જાત ઉત્સવઃ સુમહાન્યથા ।
વૃન્દાવને ગોકુલે વા તથા મે મનસિ ક્વચિત્ ॥ ૩॥

મહતાં કૃપયા યાવદ્ભગવાન્ દયયિષ્યતિ ।
તાવદાનન્દસન્દોહઃ કીર્ત્યમાનઃ સુખાય હિ ॥ ૪॥

મહતાં કૃપયા યદ્વત્કીર્તનં સુખદં સદા ।
ન તથા લૌકિકાનાં તુ સ્નિગ્ધભોજનરૂક્ષવત્ ॥ ૫॥

ગુણગાને સુખાવાપ્તિર્ગોવિન્દસ્ય પ્રજાયતે ।
યથા તથા શુકાદીનાં નૈવાત્મનિ કુતોઽન્યતઃ ॥ ૬॥

ક્લિશ્યમાનાઞ્જનાન્દૃષ્ટ્વા કૃપાયુક્તો યદા ભવેત્ ।
તદા સર્વસદાનન્દહૃદિસ્થં નિર્ગતં બહિઃ ॥ ૭॥

સર્વાનન્દમયસ્યાપિ કૃપાનન્દઃ સુદુર્લભઃ ।
હૃદ્ગતઃ સ્વગુણાચ્છ્રુત્વા પૂર્ણઃ પ્લાવયતે જનાન્ ॥ ૮॥

તસ્માત્સર્વં પરિત્યજ્ય નિરુદ્ધૈઃ સર્વદા ગુણાઃ ।
સદાનન્દપરૈર્ગેયાઃ સચ્ચિદાનન્દતા તતઃ ॥ ૯॥

અહં નિરુદ્ધો રોધેન નિરોધપદવીં ગતઃ ।
નિરુદ્ધાનાં તુ રોધાય નિરોધં વર્ણયામિ તે ॥ ૧૦
હરિણા યે વિનિર્મુક્તાસ્તે મગ્ના ભવસાગરે ।
યે નિરુદ્ધાસ્ત એવાત્ર મોદમાયાન્ત્યહર્નિશમ્ ॥ ૧૧॥

સંસારાવેશદુષ્ટાનામિન્દ્રિયાણાં હિતાય વૈ ।
કૃષ્ણસ્ય સર્વવસ્તૂનિ ભૂમ્ન ઈશસ્ય યોજયેત્ ॥ ૧૨॥

ગુણેષ્વાવિષ્ટચિત્તાનાં સર્વદા મુરવૈરિણઃ ।
સંસારવિરહક્લેશૌ ન સ્યાતાં હરિવત્સુખમ્ ॥ ૧૩॥

તદા ભવેદ્દયાલુત્વમન્યથા ક્રૂરતા મતા ।
બાધશઙ્કાપિ નાસ્ત્યત્ર તદધ્યાસોઽપિ સિદ્ધ્યતિ ॥ ૧૪॥

ભગવદ્ધર્મસામર્થ્યાદ્વિરાગો વિષયે સ્થિરઃ ।
ગુણૈર્હરેઃ સુખસ્પર્શાન્ન દુઃખં ભાતિ કર્હિચિત્ ॥ ૧૫॥

એવં જ્ઞાત્વા જ્ઞાનમાર્ગાદુત્કર્ષો ગુણવર્ણને ।
અમત્સરૈરલુબ્ધૈશ્ચ વર્ણનીયાઃ સદા ગુણાઃ ॥ ૧૬॥

હરિમૂર્તિઃ સદા ધ્યેયા સઙ્કલ્પાદપિ તત્ર હિ ।
દર્શનં સ્પર્શનં સ્પષ્ટં તથાકૃતિગતી સદા ॥ ૧૭॥

શ્રવણં કીર્તનં સ્પષ્ટં પુત્રે કૃષ્ણપ્રિયે રતિઃ ।
પાયોર્મલાંશત્યાગેન શેષભાગં તનૌ નયેત્ ॥ ૧૮॥

યસ્ય વા ભગવત્કાર્યં યદા સ્પૃષ્ટં ન દૃશ્યતે ।
તદા વિનિગ્રહસ્તસ્ય કર્તવ્ય ઇતિ નિશ્ચયઃ ॥ ૧૯॥

નાતઃ પરતરો મન્ત્રો નાતઃ પરતરઃ સ્તવઃ ।
નાતઃ પરતરા વિદ્યા તીર્થં નાતઃ પરાત્પરમ્ ॥ ૨૦॥

ઇતિ શ્રીવલ્લભાચાર્યવિરચિતં નિરોધલક્ષણં સમાપ્તમ્ ।

Proofread by PSA Easwaran

*nirodhalakShaNam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*